Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

वाणीं भजत गेर्वाणीम्

गैर्वाणी

मासिकी पत्रिका

१—८—८२	*	१५—४—८२
१५—८२	*	१५—५—८२
१५—३—८२	*	१५—६—८२



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

विषयसूचिका

★

१.	श्रीदुन्दुभि नूतनवत्सरादि शुभाकांक्षा	....	१
२.	विद्याविधानपरिवर्तनम्	....	२
३.	भगवद्गीतावाटयम्	....	५
४.	अवधान शोधन विज्ञप्तिः	....	८
५.	ऋतुवर्णनम्	....	९
६.	समभिवन्दनपत्रिका	....	१३
७.	श्रीगुरुवायुरेशसहिषा	....	१८
८.	११८२ सेप्टंबर् परीक्षाणां कालसूची	....	२०
९.	कार्श्यं गतं रूप्यकम्!!	....	२१
१०.	रूप्यकस्य मूल्यम्	....	२१
११.	आशे रंगवल्ली	....	२२
१३.	भाषाविवादः	....	२३
१४.	परधर्मो भयावहः	....	२४
१५.	सद्वाणी सुधाकरः	....	२५
१५.	गीताजयन्ती वारोत्सवः	....	२८
१६.	तमिळ साहित्य-दिग्दर्शनम्	....	२९

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

श्रीदुन्दुभि

नूतन वत्सरादि शुभाकांक्षा

नारी मानापहरणमति र्नित्य भक्ष्यादि भीमः
बद्धो भार्गानबल धनिनां नीतिभद्रादिशून्यः ।
घूर्णः प्राणै श्शिथिल तनुभि र्धूसयानदि भंगैः
सस्तां स्तीर्ण स्सुखगति रसौ दुन्दुभि र्यातु सार्थः ।

गर्तपुरी
२६-३-८२,
प्रथमा-दुन्दुभि

एवम्,
भवदीयः,
प. वें, नरसिंहाचार्यः ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

गैर्वाणी

१५—१—८२	*	१५—४—९२
१५—२—८२	*	१५—५—८२
१५—३—८२	*	१५—६—८२

विद्याविधानपरिवर्तनम्

परिवर्तनं चैतन्यतायाः लक्षणम्। परिदृश्यमानायां प्रकृतौ सर्वमपि जीवजातं नित्यपरिवर्तनशीलं दृश्यते। यद्यप्यचेतनेष्वपि परिवर्तनमस्ति तत्तु विलम्बे नावगम्यते। पशुपक्ष्यादिषु परिवर्तनं न स्वमत्यधीनम्। तत्तु प्रकृतिस्वभावत एव सम्भवति। किन्तु ज्ञानप्रधानेषु मानवेषु तत्तु स्वमेधया साध्यते। मानवः अनागरिकदशा मतिक्रम्य एतादृशं सकलसौकर्यापादिनीं दशां प्राप्त इतिचेत् तत्तस्य मेधा विलसित नित्यपरिवर्तनस्वभावत एव सिद्धम्।

प्राचीन भारतदेशे यथैव चतुर्दशविद्याः वृत्तिविद्या अपि समानयैव प्रतिपत्त्या आद्रियन्ते स्म। सर्वेऽपि स्वस्वाधीतायां विद्यायां निष्णाता बभूवुः। न तत्र निरुद्योग समस्यासीत्।

हूण परिपालनावसरे भारतीयविद्याना मपहासः कृतः। ताः विद्याः य अवलम्बते स विवेकशून्य इति परिहासः कृतः।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

तासां विद्यानां स्थाने हूणविद्या पदंचकार। यद्यपि केचनोन्नत विद्यापारंगताः तथापि बहवः कार्यालयेषु लेखन कार्यमात्रोपयुक्ताः भवन्ति। कोऽपि वृत्तिविद्या मवलम्बते तस्य संघे गौरवमेव नास्ति। सः कर्षक कार्मिकनामभाक् अप्रधानः संजातः। अतः सर्वेऽपि मिथ्यागौरवप्राप्त्यै स्वस्वजीविकावृत्तिं विहाय आँग्लविद्याभ्यासाय यतन्ते। यद्यप्यल्प मेवाधीतं तथाऽपि जीविका-वृत्तिं मवलम्बितुं न कोपीच्छति। अतः निरुद्योगसमस्या सर्वत्रापि विलयताण्डवं करोति।

एतदवस्थायां विद्याप्रणाळिकायां परिवर्तनमावश्यकमिति सर्वोऽपि मनुते। विज्ञाननिधिः राजाजीमहोदयः विद्यया साकं वृत्तिविद्या अपि बोध्या इति प्रणाळिका मेकां रचयामास। किन्तु वृत्तिविद्यां निहीनां परिगणय्य तदातनप्रभुता तां तिरश्चकार। तदा प्रभृति यदा यदा विद्यामन्त्रिण परिवर्तन्ते तदा तदा विद्याप्रणाळिकाया मपि परिवर्तनं क्रियते। किन्तु गतेष्वपि पंचत्रिंशद्वत्सरेषु तिलयन्त्रावद्धः वृषभ इव सा तत्रैव परिभ्रमते।

गतवत्सरे आंध्रप्रदेश् षष्ठसप्तमकक्ष्याविद्यार्थिनां पाठ्यांशे परिवर्तनं कृतं। विद्यार्थिनां मस्तिष्के विपुलतरा विद्याप्रवेश्या इत्याशया कठिनतराः पाठ्यांशाः समादिष्टा येऽध्यापकानामपि दुरवगाहाः वर्तन्ते। प्रथमतः अध्यापकानां तस्मिन् विषये शिक्षणं कल्पयित्वा, तेषां बोधनापाटवं वर्धयित्वा अनन्तरं यदियं प्रणाणाळिका प्रविष्टा स्यात् तर्हि वाञ्छितं फल मासज्येत्। तदा पुस्तकान्यपि बहुविलम्बेन प्रकटितानि, येन विद्यार्थिनां विद्याभ्यास कालः प्रणष्टः "क्षणत्यागे कुतो विद्या" इति सुभाषिते स्थितेमासानां त्यागेऽपि न किञ्चिन्नष्टमिति प्रभुतायाः आलोचनासरणिः।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

आन्ध्रप्रदेशे इदानीं नूतनविद्यामन्त्रि रागतः। स तु पुनरपि विद्याप्रणालिकायां परिवर्तन मावश्यकमिति मनुते। तदापि आगामिनः विद्यावत्सरादारभ्यैवानुसरणीयमिति च तेनोक्तम्। तदर्थं विश्वविद्यालयोपाध्यक्षाः समावेशिताः। एतत् सर्वं समीचीनमेव। किन्तु अध्यापकानां नूतनपाठ्यांशेषु शिक्षणां विनैव कथं वा ते तानि नूतनांशानि बोधयितुं प्रभवन्तीति नावबोध्यते। आगामिनि विद्यावत्सरे जूलैमासांत एव पाठ्यपुस्तकानि लप्स्यन्त इति यदुक्तं विद्यामन्त्रिणा तदभिनन्दनीय मेव। किन्तु नाद्यावधि पाठ्यप्रणालिकैव सिद्धा। कयं पुस्तकाना माविर्भावः जूलैमासान्त एव सम्भवती त्यालोचनीयं भवति। जून्मासमध्य एव पाठशाला उद्घाटयन्ते। यदि जूलैमासान्ते पाठ्यपुस्ताकानि लप्स्यन्ते तदवधि सार्धमासं विद्यार्थिनां किं वा पाठ्यं स्यात्, विनैव बोधनां कथं वा ते पाठशालायां स्थास्यन्तीत्यपि नावगम्यते।

विश्वविद्यालयेष्वप्येवमेव सम्भवति। वत्सरद्वयान्ते आंग्ल, देशभाषा पुस्तकानि नूतनानि निर्णीयन्ते। किन्तु तानि नूतनानि पुस्तकानि सेप्टम्बर, अक्टोबरपर्यन्तं न लभन्ते। अतः केचन पाठाः न बोधनीया इति प्रकटितं भवति। एवं अव्यवस्थितापुस्तकप्रचुरणस्थितिः विद्यार्थिनां क्रमशिक्षणाराहित्येऽन्यतमं कारणं भवति।

अतः सर्वकारः अ वेगं परित्यज्य प्रथमतः नूतनपाठ्यांशानि प्रचुरयित्वा, तत्र अध्यापकानां शिक्षणं कल्पयित्वा, यद्यप्येकवत्सरानन्तरं नूतनप्रणालिकामिमां कार्यरूपता मापादयतीत्याशास्महे।

"सहसा विदधीत न क्रियाम्"

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

भगवद्गीतानाट्यम्

(प्रयोगक्षमा लघुनाटिका)

श्रीं लक्ष्मीकांत पंढरीनाथ जाभोरकर,
साहित्याचार्य (एम. ए.) शिक्षाशास्त्री (बी. एडः)
९६ अध्यापक वसाहत, सहकारनगर, पुणे-९

मंगलम्

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्री विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥

(रणवाद्यानि श्रूयन्ते)
(नेपथ्ये रणवाद्यानि श्रूयन्ते)
[ततः प्रविशतः श्रीकृष्णार्जुनौ]

श्रीकृष्णः-अयि वीरवर अर्जुन! तवादेशं अनुसृत्य मया तवायं रथः उभयोः सेनयोर्मध्ये स्थापितः । किं विलोकिता त्वया अत्र के के वीराः समागताः सन्ति?

अर्जुनः-साद्यापि प्रत्यक्षीकृताः । अन्ये बहवः समागताः स्युः । कथय तावत् मया सह योद्धुं अत्र के के वीराः समागताः सन्ति ।

श्रीकृष्णः-ननु विलोक्य कौरवसेनायाः पुरतः एव सेनापतिपदं अलंकुर्वाणाः भीष्माचार्याः सन्ति । तेषां पार्श्वतः द्रोणाचार्याः । स्वयं राजा दुर्योधनः । एश्चासौ दृश्यते रथः स तु सूतपुत्रस्य कर्णस्य । अन्ये च बहवो वीराः । सर्वेऽपि एते अत्र त्वया सह योद्धुं उपस्थिताः ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

अर्जुनः-किं मया सह योद्धुं उपस्थिताः। यावत् मम धनुषः ध्वनिं न श्रुण्वन्ति तावदेव तेषां अयं अभिमानः। अहं तान् सर्वान् अपि जेतुं समर्थः।

श्रीकृष्णः-धनुर्धर, अर्जुन, किं न विलोकयसि? वद्धु पश्य कथं सयं राजा दुर्योधनः त्वां च अंगुलिविर्देशेन लक्ष्यीकृत्य सेनापतिना भीष्मेण सह किमपि भाषते।

जर्जुनः-किं भाषते असौ दुरात्मा? यः किल कपटद्यूतेन अस्माकं राज्यं विजित्य अस्मान् वनं प्राहिणोत् स्वयं च राज्यसुखं अन्वभवत्। भवतु नाम अचिरादेव सः स्व अविनयस्य फलं प्राप्नुयात्। (रणवाद्यानि भवन्ति)

श्रीकृष्णः-(श्रुत्वा) धनुर्धर अर्जुन! अयं दुन्दुभिध्वनिः समर-समयः सम्प्राप्तः इति सूचयति। तत् सज्जो भव।

अर्जुन-अयमहमस्मि युद्धाय सज्ज एव। (धनुः पुरतः दर्शयति अर्जुनः कञ्चित्कालं कौरवसैन्यं निपुण विलोकयन् विचार-मग्नः इव तिष्ठति)

(स्वगतम्-अये एते तु द्रोणाचार्याः, गुरुचरणाः एते। एते तु वन्दनीयाः। एते अपि भीष्माचार्याः। एतेऽपि वन्दनीयाः। अयं तु दुर्योधनः। सत्वरं घातनीयः एषः। एते सर्वेऽपि दुष्टाः। सत्वरं घातनीयाः एते। परं एते तु गुरुचरणाः एतैः सह युद्धम् केवलं राज्यस्य कृते। न हि न हि न एतद् योग्यम्। न योत्स्ये एतैः सह कदाऽपि न योत्स्ये।)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

श्रीकृष्णः-अर्जुने अयं तु किमपि विचिन्तयन् इव स्थितः। पार्थः! विचारमग्नः इव प्रतिभासि? कथय किं विचिन्तयसि?

अर्जुनः-आर्य श्रीकृष्ण! यद्यपि युद्धार्थमेव अहमत्र समागतोऽस्मि तथाऽपि एतान् स्वबान्धवान् अग्रतः विलोक्य मे मनः युद्धात् मां परावर्तयति। मन्ये एतेन युद्धेन अहं सुखं न प्राप्नुयाम्। अतः.....

श्रीकृष्णः-अत किम्? ब्रूहि अतः किम्?

अर्जुनः-अन्यं यदि अहं युद्धं न कुर्यां तर्हि सुखं प्राप्नुयाम्। त्वमेव तावत् कथय किम् एतेषां स्वबान्धवानां वधेन लब्धं राज्यं सुखाय भवेत्?

श्रीकृष्णः-अरे किमत्र सुखस्य असुखस्य वा विचारेण कर्तव्यमिति कृत्वैव त्वया योद्धव्यमत्र।

अर्जुनः-आर्य श्रीकृष्ण! किं ब्रवीषि कर्तव्यं कर्तव्यमिति। यैः बाल्यात् प्रभृति लालितः तेषां भीष्माचार्याणां वधः किं मम कर्तव्यम्। येभ्यः निखिलापि धनुर्विद्या अधीता तेषु द्रोणाचार्येषु शरान् कथं निक्षिपामि। एतैः सह युद्धं इति विचारः अपि मे असह्यः भवति। मम शरीरे कंपः जायते। हस्तात् धनुः स्रसते। मुखं मे परिशुष्यति। मे मनः भ्रमतीव। एतान हत्वा लब्धं राज्यं सुखं वा किमपि नेच्छामि। मधुसूदन! न केवलं महीकृते किन्तु त्रिभुवनस्य राज्यार्थमपि अहं स्वजनं न हन्याम्।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

श्रीकृष्ण-मूढ! किमर्थं तर्हि अत्र समागतोऽसि। यदि एतादृश्यां अवस्थायां त्वं रणात् परावृत्तो भवेः तर्हि सर्वेऽपि तत्र शत्रवः — त्व भीरुमेव मंस्यन्ते। सर्वलोकधरः अर्जुनः भयात् रणात् पलायितः इति तव अकीर्तिरेव भवेत्। किं च जानासि 'संभावितस्य च अकीर्तिः मरणात् अतिरिच्यते' इति।

[अनुवर्तते]

अनवधान शोधन विज्ञप्तिः

★

गत दिसम्बर् 81 मासिक्यां गैर्वाण्यां षष्ठे पृष्ठे — स्वर्गस्थ पुण्यस्मृतिः इति शीर्षके व्यासे - तुरीयपंक्तौ - "पेरि सूर्यनारायण शास्त्रिणां" इति स्थाने "पेरि वेंकटशास्त्रिणां" इति पठनीय मिति विज्ञाप्यते। अनवधानापतित मिदं स्खालित्यं कृपया शोधनीय मिति निवेद्यते।

जे, शेषाद्रिः,
तिरुपति।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

ऋतुवर्णनम्

श्री निष्ठल सुब्रह्मण्य',
विद्याप्रवीणः, M. A. & M A.

(वसन्तः)

हायनोऽयमनन्यश्रीः सार्थकत्वं ददातु वः ।
भूयाद्धेयर्थं मनुजोः धर्मो देदीप्यतां पुनः ॥ 1

अभद्रं द्रावयन्नन्दः तन्द्रां वो हरतात् द्रुतम् ।
कल्पिषीष्ट शुभावृत्तीः याभ्यश्शमिह लप्स्यते ॥ 2

मदयुतमधुपेन व्राजिता माधवीयम्
तनुतरमपि धूलिं बिभ्रती पौष्पवङ्गे ।
वदति पिकमुखेव श्रीः ह्रिया मेति सद्यं
रसिकजनमनोज्ञा विभ्रमानावहन्ती ॥ 3

आस्फालितं पञ्चशरेण चापं पैकेन संरावितमञ्जसा च ।
वसन्तलक्ष्म्या कृत एव हासः सञ्चूर्णितं धैर्यमिहोत्सुकानाम्॥
रजोमयश्चुम्बति पद्मिनीमलिः
वनप्रियो रौति मनांसि रञ्जयन् ।
श्रिता लता भावनिपीडिता तरुं
स्मरस्य राज्ञो मतमाश्रितं जनैः ॥ 5

सर्वतोमुखतया कुसुमेषुः लक्ष्यते परवशीकृतपान्थैः ।
यद्वनानि विकचानि सवन्तात् षट्पदोच्चलितपत्रयुतानि ॥6

(आकाशवाणीसौजन्यात्, विजयवाडा 17-1-82 दिने प्रसारितम्)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

षट्पदव्रजकैश्येव रजःपटलवाससा ।
पुष्पस्तबकवक्षोजा लता नववधूरिव ॥ 7

पिकस्स्वागतिको भाति भुञ्जानश्चूतपल्लवान् ।
साकन्दतरुसंसेवी मधुरैः कूजितैर्मधौ ॥ 8

चैत्रागमवहृष्टायाः सञ्चरन्त्याः ऋतुश्रियः ।
सञ्जीरशिञ्जितं मन्ये ध्वनि बम्भरनिर्मितम् ॥ 9

आसां समानां ददती दिवापि पतिमुज्ज्वलाम् ।
यया हि भगवान् ख्यातः सौजन्यादिगुणाकरः ॥ 10

ग्रीष्मवर्णनम्

रुचिर्वारि समाकृष्टा सायंतननभस्वति ।
पत्तालिरपि नो मञ्जु पङ्कजे लग्नतामगात् ॥ 11

स्वर्णच्छायं जगत्कर्तुं अणून तेजोमयान द्रुतम् ।
सर्वत्र सञ्चरन् धीरः प्रक्षिपत्यब्जबान्धवः ॥ 12

उष्णांशुनिकटे हन्त पद्मिनी म्लानपङ्कजा ।
चैतन्यमपि लोकानां दिवा हन्त विकर्षितम् ॥ 13

सप्ताश्वकिरणै स्तप्ता धरणिः बाष्पसन्ततिम् ।
मुञ्चती क्रन्दवं कर्त्री कटुभिः पक्षिणां रवैः ॥ 14

सरस्सु न पयो दृष्टं न दृष्टाः पक्षिणस्तरौ
वीथ्यां गृहेषु नो दृष्टः व्यजनेन विना पुमान् ॥ 15

प्रावृड्वर्णनम्

तमालनीलं प्रतिगर्जदम्बरं
सौदामनीं खड्गलतां च संधरत्
मुहुर्मुहुः पान्थगणैर्विलोकितं
बिभर्ति योधौघसदृक्त्वमुद्धतम् ॥ 16

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

ग्रीष्मोष्मतप्तं सुरवर्त्म नूनं
शनैश्शनैर्मुञ्चति वारिबिन्दून् ।
नभस्वदालिङ्गितसत्कृतं हा
धाराः सृजद्भन्त पुरा रुरोद ॥ 17

कुत्रावनिः ? कुत्र नभो? विदिङ् वृ
शकुन्तराजिः क्व नु सञ्चरन्ती?
भिदा न दृष्टा जगताऽणुरूपा
सृष्टेः पुरा वारि जनैरवादि ॥ 18

मन्दान्धकारे दिशमाप्नुवाने
वनेषु सिक्तेषु जलैर्मृगेषु ।
जन्त्वौघचेतोदलवादिवास्ते
कल्हारराजी रुधिरस्य धारा ॥ 19

इतःपरं नो धरणिर्विलोक्यते
न पञ्चभूतानि जलं हि केवलं ।
नदीभिरित्थं हृदये विनिश्चितं
द्रुतं रुदन्त्याः प्रचलन्ति वारिधिम । 20

शरद्वर्णनम्

सौन्दर्यं नभसो द्रष्टुं स्फुटपङ्कजलोचना ।
स्रोतस्विनी समुत्कण्ठा राजते ध्वनिभासुरा ॥ 21

सिताम्भोजनिषण्णेयं शारदी श्रीर्विराजते ।
राजद्राजमुखाऽम्भोदवसना जवर्क्षिणी ॥ 22

अध्वान पङ्कसंमृष्टः सस्यं चक्षुमनोहरम् ।
क्षमप्रधाणी रजनीवासरौ जवसंस्तुतौ ॥ 23

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

हेमन्तवर्णनम्

स्पर्धालुना हन्त हिमाद्रिणा हरिं
दिवं भुवं स्वात्मतया परीप्सया ।
अकारि लोको मिहिकासमावृतः
मोघीकृताशुः तपनो विलज्जितः ।। 24

हेमन्तस्य यशोराजिः तुषारच्छद्मना बभौ ।
सिताम्भोजमिवाभाति हिमं वायुधृतं महत् ।। 25

सकुंकुमक्षोदकुचा रमण्यः
विगूहमाना मिहिकाविलाद्धे ।
चरन्ति सौधान्तरमाभजन्त्यः
कदुष्णवस्तूनि समाहरन्त्यः ।। 26

शिशिरवर्णनम्

हैमनाविलनिष्क्रान्तात् नृणां सञ्चारमाददौ ।
पल्लवान् विसृजन्नेष दोषाविव विभासते ।। 27

निर्जित्य हिमसङ्घातं रविस्तापयत् पुनः ।
तुषारकणिकास्सर्वाः अन्तरिक्षाम्बुमार्ज ह ।। 28

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

श्रीः

ब्रह्मश्रीयुताम् श्रीकृष्णशर्मसदभिख्यान श्रीवेङ्कटेश्वरविश्वविद्यालय-
कलाशालासंस्कृतप्राचार्यपदवीतः अचिरेण विरति
मुररीकरिष्यमाणान् सभाजयितु मायोजितायां
यस्यां उभायां सश्रद्धाभरं निवेद्यमाना

सभाभिनन्दनपत्रिका

श्रद्धाराद्धगुरुप्रसाद विभवप्राप्तोरुविद्याधनाः !
लीलाविर्मितवैकशास्त्रविषयग्रन्थात्त सत्कीर्तयः !
निस्तन्द्रप्रतिभाविभासमुदयज्ञातेद्धशास्त्रागमाः !
प्रक्षावन्दणकीर्त्यमानचरिता वैपश्चितीभासुराः !

अङ्ग! सुरवाणीनित्यसेवाहेवाकिनः, सहृदयवतंसाः!

तत्रभवन्तः श्रीवेङ्कटेश्वरविश्वविद्यालयानुबन्धिन्यां कला-शालायां नानाप्रकाराः पदवी उदुह्य, आचार्याः, प्राचार्याः, अध्यक्षाः, विश्वकलापरिषदङ्गभूतप्राच्यभाषाशोधालयनिर्देशकाश्च भूत्वा इतरजनदुष्करां श्लाघनीयां गीर्वाणवाणीसेवां विंशत्यधिकान् वत्सरान् विरचय्य, तथा स्वस्य-विद्यालयस्य च प्रतिष्ठां सभाजयन्, यथा सखायः, सहकर्मचारिणः, शिष्याः, परिचिता स्सर्वेऽपि भवतो न विस्मर्तुं शीशते। सुदृढां भवदीयां स्मृतिमुद्रां हृदयात् प्रोञ्छितुं न प्रभवन्ति। तत्रभवतां तलस्पर्शिनी वेदग्धी, गम्भीरं उदारं स्वकीयतापरकीयताविकल्पदवाया हृदयं, भाविकालानुकूला पुरः-

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

स्फूर्तिमती मतिश्च रसिकस्वान्तसमाकर्षणीपथिकावि उपकरणावि भवन्ति ।

अयि भोः ! बहुमुखविज्ञानसमर्जनकृतमुखाः कृष्णसूरयः ! षड्दर्शनीवल्लभाः भवन्तः, विदुषां 'वाक्यार्थ' गोष्ठीषु, 'समीक्षा-परिषत्सु सौहित्यसंशोभिसाहित्यसभावेशेषु च मार्गदर्शिता भवनु वावा दृश्यते । केरलाभिजना अत्रभवन्तः प्रायमिकं प्राच्य-विद्याधिगम पट्टाम्बिसमाह्वये जनपदे, 'प्राच्यविद्येश्वर' बिरुदं Degree of Master of Arts), भद्रनगरीविराजमानविश्वविद्यालये, विद्यावाचस्पवि' पट्टं (Ph D. Degree) शर्मण्य (Germany) देशीय 'मारबग् विश्वकलापरिषदि समपापदन्निति नन्विद्द मस्माकं भारतीयानां अखर्वगर्वकारणं भवति । उदितोदिते पाण्डित्य-मण्डिते साम्प्रदायिके संस्कृतसुरभौ अन्ववाये समुद्धूय, अध्यापक-कलाघात्मवीना भासाद्य तां विश्वजनीवां वितत्य योग्यतानु-विधायिभिः आन्ध्रप्रदेशप्रभृताधिकृतैः विश्राणितं 'उत्तमोपाध्याय पद मादर्शभवाया भवन्तः स्वीयां कारणजन्मतां प्राचकाशन् किल ।

अत्रभवतां जीवनसरणिः आरम्भलघवी परिणामगुर्वी च लक्ष्यते । प्रथमतः पाठशालायां उपाध्यायाः, पश्चात्प्रधानोपा-ध्यायाः, ततो ग्रन्थालयाध्यक्षाः, परतो विश्वविद्यालये आचार्या, तदनु प्राचार्याः, तदनन्तरं अध्यक्षाश्चेति उदित्य गीर्वाणभाषां प्राणसमां परिपुष्णन्ति । सृजनता - जिगीषुता - विदग्धता - अलङ्कर्मीणता - प्रारब्धनिर्बोढृता - लोकज्ञता - विनयशालिता इतिकर्तव्यताविवेकिता - प्रभृतिभि गुणैः परिकर्मिताः शुक्लपक्ष-क्षपाकरतुला मधिरोहन्ति ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

अयि भोः! अभ्युपगतविपुलकृत्यनिर्वहणप्रीणितलोका गुणाकराः!

सर्वस्या अपि संस्थायाः वेश्म - कुड्य - कपाट - मूलशिला, सुधा - स्तम्भादीनि च प्रधाना न्यङ्गानि। अपि तु तत्र वियुक्ताः सन्तः कर्मचारिण एव परमयश स्समार्जयेयुः। तत्त्व मिदं विदित्वा भवन्तः संस्कृतशाखां वर्धिष्णुमि विद्वद्भि रापूर्य, तामपि शाखा मता मिव स्वाधिकारेण विनूतनशोभां बुधजनसंमता मबाविषुः। कदाचित् शमण्यदेशीयविश्वविद्यालयेषु प्राघूर्णिकोपन्यासकाः, जातुचित् संस्कृतसंस्थाया स्समुपदेष्टारः, अन्यदा नवदेहलीविराजि केन्द्रीयसाहित्यसदस्सदस्याः, कदाऽपि केन्द्रीयसंस्कृतविद्यापीठसभासदः, जात्वऽपि अग्निचयनमहायागपरिषत्पारिषद्याश्च भूत्वा बहुमुखीं प्रज्ञां व्यस्तृणन्।

पाण्डित्यपारीणता, कुशाग्रीयमतिता, विमर्शकलावदीष्णता कवितानिर्मितिनैपुणी, ग्रन्थपरिष्करणप्रथविष्णुता चेति एते गुणएकैकशोऽपि मनुष्येषु दुर्लभाः, किमुत सर्वेषां समवायः! परन्तु विचक्षणा भवन्तः सकलै रेतैर्गुणै स्संपन्ना विधात्रा व्यधायिषत, यत् दर्शंदर्शं तुल्ययोगक्षेमपदवीका असूयेषु भवद्भ्यः। स्मितपूर्वाभिभाषिणः पूर्वभाषिणश्च भवन्तः स्वया वाचोक्तिपटुतया, मधुरशीलतया च असूयुनापि विदुषा विस्मापयन्तो मित्रयन्ति।

अङ्ग! शिक्षिविविधविद्यासमुत्तीर्णगणेयत्छात्रविख्यापितवैपश्चितीवैभवाः! शिष्यवत्सलाः!

स्वय मुपाध्याया स्सन्तो भवन्तः छात्राचार्यसंबन्धस्य प्रधानतां पवित्रतां व्यजानन्। "स संबन्ध एव सन् असंश्च अन्तेवसन्तं नाकं वा नारकं वा नेतुं प्रभवतीति इदं विद्वान् आचार्यो जागरूको भूत्वा चापलेभ्य शिशष्य विवार्य सुपथि वियुञ्जीत —

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

इति हि तत्रभवता मुदारोऽभिसन्धिः। तत्रभवद्भिः दर्शित-सुपन्थाः कृतज्ञताबद्धा अन्तेवासिनः आर्यमिश्रान् आध्यायन्ति। मूर्तिमती तितिक्षेति, स्फूर्तिमती पथप्रदर्शकतेति भवतः श्लाघ्यते तद्विदः।

भो! ग्रन्थशोधन-परिष्करणकलापारीणाः प्रतिभापरिणाहप्रभावित-स्वान्ताः कविशार्दूलाः!

बहुग्रन्थप्रबन्धार इति प्राच्यप्रतीच्यदेशेषु अवैषम्येण सदा स्मरणीया महोदयाः! पाश्चात्य शर्मण्यदेशे प्रकाशितं सव्याख्यानं 'कौषीतकीब्राह्मणं' नाम ग्रन्थः भवतां चिरस्थास्नुः कीर्तिपताका। इदं तत्रभवतां अगाधां वैदिकविज्ञानचुञ्चुतां पिशुनयति। 'मणिकणा' परिष्कृतः आङ्ग्ल्या मनूदितश्च न्यायशास्त्रपरिचयं प्रकाशयति। "अंपाणिनीयप्रामाण्यसाधन" नाम वपुषा लघु रपि अलघुसिद्धान्तसमृज्ज्वलो ग्रन्थः व्याकरणशास्त्रनिष्णातां निर्दिशति। गजशिक्षा गजग्रहणप्रकारप्रमुखा ग्रन्थाः परिष्कृत्य प्रकाशिताः सारस्वतशाखान्तरेष्वपि श्रद्धा मुद्भासयन्ति। उभय-मीमांसादर्शनयोः प्रगाढं पाण्डित्यं अन्याः कृतय आविर्भावयन्ति। केरलभाषामयं सन्ध्यासमभिधान खण्डकाव्यं ललितमधुरं देवगव्यं मनूदितं सत् कवितावितितिचातुरीधुरीणता माविष्करोति। किं बहुना जल्पितेन, तादृशी संस्कृतसारस्वतशाखा न काचि दव-शिष्यते, या तत्रभवद्भिः न परामृश्यत; तादृशा पराभृष्टा शाखा न परिदृश्यते, या कृतमुखैर्नाऽलं अलंकारि।

अहो बहुगणगुणमणिभूषणा धरणीसुपर्वाणः!

भवन्तः शरीरेण च तथा दृढाः, यथा बुद्धिनिभवेन। कण्ठ स्वरेण च तथा तरस्विनः, यथा स्त्रीयेन वाङ्मुखेन। अपघन-

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

सन्निवेशेव न नथा ओजस्विनः, यथा अध्यवसायेन। विरम्य पदव्याः परागतेषु अत्रभवत्स्वपि तत्र भवत्सुः श्रद्धालुना अध्यापकेन, विवेकिवा विबुधेन, असंख्येयप्रबन्धानां निर्मात्रा, आनन्दवर्धनेन कविना, कृतात्मना अध्यात्मविद्याप्रवक्तृत्वेन, किं बहुना' बहुधा आप्तबन्धुना हृदयालुना महनीयेन हीयामहे। भविष्यद्विप्रयोगविधुरेण हृदयेन 'पन्थाव स्वन्तु व शिवाः!' इति प्रास्थाविकीं माङ्गलिकीं गिर मुदीरयामः। भृश मुद्विग्नमानसाना अस्माक मिदमेव समाश्वासनं भवति यदुत तत्रभवन्तः शश्वदस्माकीनेषु मानसेषु प्रतिष्ठापिता, आख्यानेन हृदयपीठ मारोपिताः सदाऽनुग्रहीष्यन्तीति। इदम्पदवीविरचणमुररीकुर्वाणा अपि आर्यमहोदयाः इतोधिका उन्नतोन्नताः पदवीं आस्थाय सुरभारत्या विस्सजां सेवां यथा विधास्यन्ति, तथा देवना स्सुप्रसन्ना भवतोऽनुगृह्णासु रिति प्रार्थयामहे। एव मभिनन्दन्तो वयं सर्वाङ्गीणावि समस्तसन्मङ्गलानि आशास्महे। वृषाकपि रपि वृषाकपिप्रमुखै र्देवै रनारतमाराध्यमानां, वृषवर्धनोऽप्यवृषवर्धन, अभवोऽपि भवप्रधानः वृषभाचलाधित्यकानिवासी भगवान् श्रीनिवासः —

शेषाद्रे शिखरं श्रितो भृगुसुतासोदामवीरञ्जितः
तापक्लुप्टजनार्तिनोदनिपुणः शार्ङ्गेद्धकालांबधः।
आयु र्दीर्घ, मनामयं, बहुमुखं श्रेयः श्रियं शाश्वतीं दत्त्वा
व स्सकुटुंबका ञविरतप्रेम्गाऽनुगृह्या चिरम्॥

श्रीपदपुरी
२९-१-१९८२

श्रीमच्छ्रीकृष्णशर्मसुमभिवन्दनसभासदस्याः

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

श्रीगुरुवायूरेशमहिमा

काचित् भक्तकथा

विदुषामनुचरो नीलकण्ठः।

सुप्रसिद्धगुरुवायुपुर निकटवर्तिनि कस्मिंश्चित् ग्रामे नारायणीयकर्तुः नारायणभट्टपादस्य समकालीनः पून्तानमितिस्वकुटुंब नाम्ना प्रसिद्धः भक्ताग्रणीः केरलब्राह्मण आसीत्। अनेकभक्तिग्रन्थाः तेन विरचिताः सन्ति। भागवतार्यव्य ख्याने अनितरसाधारणपाटवः तस्यासीत्॥ प्रतिदिनं गुरुवयूपराधीशं दृष्ट्वा तत्र जपनमस्कारादिकं च समाप्य एव सः यत्र कुत्रापि गच्छति। स चैकदा रात्रौ दर्शनादिकं कृत्वा आत्ययिके कार्ये ग्रामान्तरगमने मतिं चकार। निस्सहायो निशायां निर्मनुष्येण पथा सञ्चरन् कियत् दूरं गतः। मध्ये मार्गं तस्करेण केनाप्याक्रान्तः। चकितचकितः सः हरे कृष्णेत्युच्चैः चुक्रोश। तदरण्यरुदितमन्वयं जातम्। तस्करोपि तं बलादाकृष्य तदीयं यत् किञ्चित् द्रव्यं चापहृत्य स्वच्छन्दं जगाम। निराश्रयो भीतश्च ब्राह्मणः—हे कृष्ण! द्वारकावासिन् गुरुवायुपुरेश, द्रौपदीप्राणसंरक्षक, गजेन्द्रमोचन क्वासि ममेदृशीमवस्थां किं न पश्यसि। आर्तत्राणपरायणः खलु भवान् इत्युपालम्भं कुर्वन् इतिकर्तव्यतामूढः आसीत्। तदानीं अश्वारूढः कोप्यागत्य तं सान्त्वयित्वा ततं साहाय्यं कुर्वन् ब्राह्मणमनुजगाम। यात्रावसाने सोप्यश्वारूढः तत्साहाय्यकरणे पारितोषिकं यत्किञ्चित् दीयतां इति तमवोचत्। विप्रोऽपि सर्वं धनं तस्करेण अपहृतं अंगुलीयकमेकमस्ति एक तत् समन्तोषं स्वीक्रियतामिति दत्वा तं अभ्यनन्दत्। अंगुलीयकग्रहणपात्रे एव अश्वारूढोपि अन्तरधात्। अद्भुत

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

परतन्त्रो ब्राह्मणः श्रीकृष्ण एव मत्साहायकत्वे आगत इति मनसि विचिन्त्य स्वस्थोभूत् ।

तद्रात्रावेव गुरुवायुपुरेशस्य प्रधानार्चकः स्वप्नं कञ्चित् ददर्श । यदा भगवान् श्रीकृष्णः प्रत्यक्षमागत्य स्वः मम पादमूले अंगुलीयकमेकं पश्यसि तत् दर्शनायागतस्य पून्तानब्राह्मणस्य हस्ते देयं इत्युक्त्वान्तरधात् । अर्चकोपि किमिति सत्यं स्यादिति चिन्तयन् आश्चर्येण निशां विनाय, परेद्युः प्रातःकाले यथावत् मन्दिरप्रविष्टः निर्माल्यादिकं गृहीत्वा शुद्धिकर्मणि व्यापृतः अंगुलीयक भगवत्पादमूले ददर्श आश्चर्यस्तब्धश्चासीत् ।

पून्तानब्राह्मणोऽपि यथावत् आराधनायागतः । तदा अर्चकोपि स्वप्नकथां व्यजिज्ञपत् । अंगुलीयकं चादाय ब्राह्मणहस्ते विनयेन समर्पितवान् । सोपि प्रेम्णा तदालोक्य पूर्वेद्युः साहाय्यकरणाय आगतस्य अश्वारूढस्य पारितोषिकत्वेन दत्तमिति ज्ञात्वा अश्वारूढरूपेणागतः साक्षात गुरुवायुपुरेश एवेति जानन् पुलकाङ्कितः चिरं भगवन्तं स्तोत्रैरानर्च । तत्रत्याः कथामिमां श्रुत्वा विसिस्मयुः पून्तानं प्रशशंसुश्च ।

भगवन्तः भक्तपरायणत्वकथने इयमप्येका कथा । आर्तत्राणपरायणः सः भगवान् श्रीकृष्णः पुरुवायुपुराधीशः मङ्गलं सर्वमातनोतु ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

1982 सेप्टंबर् (1903 दुर्मति-दक्षिणायन) परीक्षाणां कालसूची

परीक्षा	11—9—82		12—9—82		13—9—82	
	प्रातः 10 A. M	सायम् 2 P. M.	प्रातः 10 A. M.	सायम् 2 P. M.	प्रातः 10 A. M.	
परिचयः	—	—	परिचयः	—	—	
अभिज्ञः	—	—	प्रथमखण्डः	द्वितीयखण्डः	—	
विचक्षणः	—	प्रथमखण्डः	द्वितीयखण्डः	तृतीयखण्डः	—	
समर्थः	प्रथमखण्डः	द्वितीयखण्डः	तृतीयखण्डः	चतुर्थखण्डः	—	
कोविदः	प्रथमखण्डः	द्वितीयखण्डः	तृतीयखण्डः	चतुर्थखण्डः	पञ्चमखण्डः	

कार्यस्थानम् - चित्तूरु,
15—6—82

परीक्षामन्त्री,
संस्कृतभाषाप्रचारिणी सभा ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy.

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

कार्यं गतं रूप्यकम् !!

नवदेहली, मार्च् 6 – गतवर्षे दिसम्बरमासे रूप्यकस्य ग्राहकशक्तिः (क्रयविक्रययोग्यता) 21–74 पैसा आसन्निति आर्थिक-शाखायाः माह्यवन्त्री श्री यस्. यस्. शिशोडियामहोदयः ह्यः लोकसभायां निवेदयामास। 1960 वर्ष प्रातिपदिकतया कल्पितां मूल्य सूचिका वनुसृत्य परिशीलवे 1947 तमे वर्षे रूप्यकस्य ग्राहकता-शक्तिः 138.89 पैसा इति, 1961 तमे वर्षे 96.15 पैसा इति च तेनोक्तम् ।

* * * *

रूप्यकस्य मूल्यम्

1949	–	100	पैसाः	1981	एप्रियल्मासे	23 पैसाः
1950	–	99	,,	1981	जून्मासे	22.7 ,,
1960	–	80	,,	1981	आगस्ट्मासे	22 ,,
1970	–	44	,,	1982	फिब्रवरीमासे	21 ,,
1973	–	36	,,			
1977	–	32	,,			
1980	–	26	,,			
		1982	–	18 पैसाः केवलम् ।		

* एतत्सर्वं मूल्यविवरणं आधिकारिकम् । यद्यप्यनधिकृतं परन्तु वास्तवं मूल्यांकवं तावदिदमिदावीम्

* * * *

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

आकाशे रंगवल्ली

सूल्लूरुपेठा, मार्च् 5 ईनाडु —

मार्च् प्रथमदिवाके सायंकाले 6.40 समये पूर्वस्यां दिशि वियत्तले विचित्रकान्तिः उत्थिता। पश्यता मेव सतां कतिपयेषु क्षणेषु स्वर्णवर्णेन प्रश्नचिह्नं? साक्षात्कृतं 25 निमिषपर्यन्तं शनैः शनैः विस्तृतं सत् आश्चर्यावह मासीत्।

श्री हरिकोटकेन्द्रे सम्प्रति 20 (विंशतिः) पि. आर्. यल्. शस्त्रज्ञाः (अहम्मदाबाद्) अयनोस्पियर्-परिशोधनार्थं — भूवातावरणोपरितनेषु स्तरेषु विद्युदाविष्टकणमण्डलपरिशीलनार्थं — आर् हेच्. 560 राकेट्-यानैः प्रयोगान् निर्वहन्ति। प्रोफेसर् रविपाठि राघवरावुमहोदयस्य आध्यक्ष्येण प्रयुक्तानि एतानि राकेट्-यानानि भूम्युपरितले 350 कि मी औन्नत्ये बेरियं. सोडियं द्रव्यजातं प्रवेशयन्ति। एवं विसृष्टं द्रव्यजातं आकाशे विविधान् वर्णान् विस्तारयति स्म। एतत्प्रयोगफलितपरिज्ञानाय वर्षपरिमितः कालोभवेत्। त्रिचतुरवर्षेभ्यः आरभ्य अयमुद्यमः आस्थितः।

अयनोस्पियरे सम्भवतः सुञ्चलनस्य मूलकारणान्वेषणार्थं प्रवृत्तस्य अस्य प्रयोगस्य सद्यः फलितमेव सुन्दरतरतेजः पुञ्जसन्दर्शनं वियत्तले समभवत्। वार्ताप्रसारे आकाशवाण्याः प्रामुख्य मितर साधारणम्। आकाशवाणीतरंगेषु संक्षोभः, कल्लोलः अस्पष्टता एवमादिदोषाणां कारणं तन्निवारणं च ज्ञातुं अयं प्रयोगकार्यक्रमः प्रारब्धः।

* * * *

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

भाषाविवादः

नवदेहली, मार्च् 6 – दिल्ली पाठशालासु त्रिभाषासूत्रं सम्यक् आचरणमार्गे नास्तीति केचित् सभ्याः लोकसभायां निरसनं प्रतिपादयामासुः । केन्द्र विद्याशाखामन्त्री सुशीलाकोल् कस्य –चिदनुबन्ध प्रश्नस्य समाधानप्रदाने तमिलनाडुप्रदेशे हिन्दी व्यतिरेकोद्यमस्य सद्भावात् दिल्ली पाठशालासु विद्यार्थिनः दाक्षिणात्यभाषाध्ययने वैमुख्यं प्रदर्शयन्तीति प्राह । ए. ऐ. डि. यम्. के सभ्या श्रीमती सत्यवाणीमुत्तु, मोहवरंग नामा अन्यश्च सभ्यः एव माहतुः — "तमिळभाषापठने यदि वैमुख्यं तर्हि तत् युज्यते । इतर दाक्षिणात्य भाषाणां तेलुगु - कन्नड - मलयाळानां अध्ययने का विप्रतिपत्तिः इति । इममंश मधिकृत्य बहूनां सभ्यानां आशङ्कित विज्ञाय सभाध्यक्षः सर्वघण्टापर्यन्तं चर्चायाः अवकाशप्रदानं समुचितमिति घोषयामास । "उद्यम"शब्दः न मया प्रयुक्त इति मन्त्री सुशीलाकोल् निरस्यत् । सभाध्यक्षः हिदायतुल्ला प्राह – मन्त्रिणो यदि नायमभिप्रायः तर्हि सर्वं समञ्जसं भवतीति ।

"अवरः"

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

परधर्मो भयावहः

— पं. या. वि. देवास्करः, वडोदरस्थः

वीक्ष्य धर्मान्तरं जातं अद्यः सामूहिकं बहत् ।
अभया विश्वहिन्दूनां विश्रुतो जनजागरः ।। 1

वेदोऽखिलो धर्ममूलं हिन्दुधर्मः सनातनः ।
रक्षणीयः स्वधर्मो हि परधर्मो भयावहः ।। 2

संगच्छध्वं संवदध्वं, भ्रान्ता भो धर्मबान्धवाः ।
काले हि कठिने प्राप्ते, धर्मो रक्षति रक्षितः ।। 3

स्वराष्ट्रोद्धारको हिन्दु र्वं हिन्दुः पतितो भवेत् ।
स्वधर्मः सङ्कटे रक्ष्यः परधर्मो भयावहः ।। 4

सुजला सुफला तीर्था भूरियं सस्यश्यामला ।
जन्मभूतारको हिन्दु र्वं हिन्दुः पतितो भवेत् ।। 5

सदा धर्माभिमानी च हिन्दुः सात्विक उत्तमः ।
"स्वधर्मे निधनं श्रेय" माह योगेश्वरो हरिः ।। 6

जयस्तस्य जयस्तस्य कुतस्तस्य पराजयः ।
भो धर्मबान्धवा वीराः भवे भवत संहताः ।। 7

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

सद्वाणी सुधाकरः

श्री बालगणपतिभट्टः, श्रीरङ्गपत्तनम् ।

सर्वतो मधुरा सा स्यात्
चोषिता खंडशर्करा ।
साकारो वा विराकारः
भगवान् सुखदस्तथा ॥ १

दीपे यथा पतङ्गस्तु
गुडे यद्वत्पिपीलिका ।
भक्तस्तद्वद्भगवति
नित्यसक्तो विराजते ॥ २

मोदकं वदने प्राप्य
शिशुर्मौनं भजत्यहो ।
धर्मस्य स्वादुतां प्राप्य
मौनं भजति साधकः ॥ ३

भक्तं तु मानवं लब्ध्वा
भक्ति - स्त्री रमते यदि ।
माया नारी तदा तस्मात्
भीता धावति दूरतः ॥ ४

तन्तूक्तं प्रविशति
सूत्रं सीवनिकामुखे ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

भगवद्गुम्फनं कर्तुं
चित्तं तद्वत्तनूकुरु ॥ ५

जलस्थनौका यदि वार्यदभ्रं
विशेत्तदा मज्जति सैव नौका ।
तद्वद्रतीच्छा हृदये नरस्य (तद्वद्धि संसाररतिर्नरस्य)
(त्वगाध) (संसार)वारान्निधिमज्जनार्थम् ॥

शुभ्रेऽथ वस्त्रे यदि कालिमाङ्कः
लग्नः सुदृष्टः भविता च लोके ।
यदृच्छयालिङ्गितदोषलेशः
स्पष्टं हि दृष्टः पुरुषेऽपि पूते ॥ ७

कूपरूपस्तु संसारः
धृतिहीनस्सदा स्मृतः ।
स्वयं विस्मृतदेहस्तु
नूनं कूपे पतत्यहो ॥ ८

धनधान्यादिसिद्ध्यर्थं
रुदन्ति बहवो भुवि ।
रुदन्ति यदि देवार्थं
देवस्सन्निहितो भवेत् ॥ ९

पुस्तकानां सहस्रेण
श्लोकानामयुतेन वा ।
अनुष्ठान विहीनस्य
न स्याल्लाभः कदाचन ॥ १०

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

गच्छन् गच्छन् दिशं पूर्वां
प्रतीची दूरतो भवेत् ।
तद्वद्धर्मपथस्थस्य
संसारः दूरतो भवेत् ॥ ११

आत्मस्तुतीच्छा परनिन्दनेच्छा
कदापि मत्तो न भवेन्महेश ।
अण्वादिकाणन्त समस्तवस्तु –
व्याप्तस्य चिन्ताश्रयवन्ममा स्तु ॥ १२

माता स्वपुत्रं मलिप्तदेहं
परं रुदन्तं हृदयेन यद्वत् ।
आलिङ्ग्य शान्तं कुरुते हि तद्वत्
देवोऽपि भक्तं मलिनञ्च पापैः ॥ १३

लोकपापं समादाय गङ्गा गच्छति सागरम् ।
एनोबन्धनसम्बद्धमोक्षशीला हि साधवः ॥ १४

सम्राड्वैभवयुक्तोऽपि दीर्घजीवी नरोत्तमः ।
सर्वैः कालाहितो दृष्टः सज्ज्ञानी न कदाचन ॥ १५

शर्करा स्वादुता या स्यात् शर्करैव न संशयः ।
जगद्विश्वात्मनासृष्टं तथैव प्रभुरीश्वरः ॥ १६

मद्यपायी सदोन्मत्त सदाजल्पति गायति ।
देवभक्तिसुरापायी भक्त सौवी कथं भवेत् ॥ १७

दारासुतगृहादीनां विष्णुपादसमर्पणम् ।
एतद्भक्तस्य धर्मः स्याद्भजनं च विशेषतः ॥ १८

सूर्योदयस्य समये ह्यस्त यांति यथोडवः ।
भक्तिसंभूतिवेलायां न स्युः कामादयोऽरयः ॥ १९

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

गीताजयन्ती वारोत्सवः

लेखकः
जे. एल्. एन्. शास्त्रि

★

एलूरुग्रामे पवर्पेट्प्रान्ते अरविन्दविद्यालये विश्वहिन्दू-परिषदः आध्वर्ये डिशम्बर् 7–12–81 प्रभृति 13–12–81 पर्यन्तं गीताजयन्ती वारोत्सवाः कृताः। तेषु दिवेषु क्रान्तिवदिवे भगवद्गीतायां द्वादशोऽध्याये पञ्चदशेऽध्याये च श्रीमती इन्द्रगण्टि सूर्यनारायणमूर्तिमहोदयानां आध्वर्ये विद्यार्थिनां विद्यार्थिनीनां च स्पर्धा निर्वाहिता। तत्रापि कलाशाला माध्यमिकपाठशाला प्राथमिकपाठशाला इति त्रीन् विभागान् कृतवन्तः। तद्दिवे 13–12–81 सायंतने सभा निर्वाहिता। तत्सभायां पुरप्रमुखा पारिश्रामिकवेत्तारः शवगोपालुतुल्लानीमहोदयाः अध्यक्षपीठं अलंकृतवन्तः। पश्चिमगोदावरिजिल्ला विश्वहिन्दूपरिषत् कार्य-दर्शिनः श्रीरामचन्द्रमूर्तिमहोदयाः परिषत् वैशिष्ट्यं प्रति उक्तवन्तः तत्कार्यक्रमाणि च। अन्ततः डाक्टर् धर्मारावुमहोदयाः विजेतृणां बहुमतिप्रदानमकुर्वन्। तेन कार्यक्रमेण तत्सभा समाप्ता बभूत्।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

तमिळ - साहित्य - दिग्दर्शनम्

"अवरः"

[पूर्वानुबन्धः]

1652 पद्यैः "शिलप्पदिगारं नाम महाकाव्यं तमिळपञ्चकाव्येषु द्वितीयमपि अद्वितीयं गुणत" इति सुवचम् । कथादृष्ट्या परिशीलने इदमेव काव्यं प्रथमतः प्रकाशितमिति भाति । मणिमेकलै, शिलप्पदिगार मित्येतत्द्वयं युग्मकाव्यमिति कथ्यते ।

"शिलम्बु" नाम मञ्जीरम् । तत्सम्बन्धिनी कथाऽत्र प्रतिपादितेति अस्य काव्यस्य "शिलप्पदिगारं" इत्यन्वर्थं नाम कृतमस्ति । इदं क्री. श. 9-व शताब्द मध्यभागे रचितमिति परिशोधकाः, क्री. श. 2 शताब्दे रचितमिति पण्डिताश्च अभिप्रयन्ति । पतीदेवीति सन्नुतायाः कण्णकि नामधेयायाः तमिळमहिळायाः पावनचरित मस्मिन् काव्ये साक्षात्कारितम् । तेलुगुबतक म्मगाथेव कण्णकि कथा तमिळानां जातीयगाथा भवति ।

तमिळानां सामाजिकजीवनं अन्नपानादिकं पल्लीपट्टणादि तद्गता विशेषाः वाणिज्यस्थितिगतयः, इन्द्रोत्सवः, तदानीन्तना विनोद विभवाः संगीत - नृत्यप्रदर्शनेषु तदीय गाढादरातिशयाः वारकान्तानां हाव-भावाः, समुद्रव्यापारः, मत्स्यकाराणां जीवनविधानं इत्यादि बहुविषयाणां सुष्ठुवर्णन मस्मिन् काव्ये दरीदृश्यते । तत्कालीन तमिळ - सामाजिक - जीवन प्रतिबिम्बनिलयं मणिदर्पणमिदं शिलप्पदिगार - महाकाव्यम् । कथादृष्टपथेन परिशीलनेऽपि ईदृशं मधुरमञ्जुलं काव्यं तमिळसाहित्ये नास्तीति सुवचम् । एवं च सर्वथा "मणिमेकलै - शिलप्पदिगार"

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

काव्यद्वयं तमिळभाषा योषायाः समर्पित ममूल्यमाभरण मिति निश्चप्रचम् ।

शिलप्पदिगारकाव्यं इळंगोनाम्नः राजकवेः मधुरमनोज्ञ सृष्टिः । स चेरराजस्य "शेंगुट्टुवन्" इत्यस्य सोदरः । भ्रातृ-गौरवेण राज्याधिकारं परित्यज्य सन्यासं स्वीचकार । अत एव स "इळंगो अडिगळ्" (इळंगो पूज्यपादाः) इति गौरवार्हं आसीत् ।

इळंगो जैनमतावलम्बी । तत एव तदीया कृतिः शिल-प्पदिगारं जैनमताचार वैशिष्टयं विवृण्वन्प्रशस्तं प्रशस्तिकाव्यं सत् विराजते । नाटकात्मकता गतस्य अस्य काव्यस्य "इयल (साहित्य) इशै (संगीत) नाटकप्पोरुळ् तोडर्निले शेय्युळ्" इति "नाटक काप्पियम्" (दृश्यकाव्यं) इति च नाम्ना व्यवहारोऽस्ति । अर्था शिलप्पदिगारं दृश्यकाव्यतया प्रणीतं पद्यकाव्यमिति वक्तुं युक्तम् ।

तमिळजातीयकाव्यम् —

शिलप्पदिगारस्य इतिवृत्तं कण्णकि जीवितगाथेति इतःपूर्वं मुक्तमेव। चोळदेशे जनित्वा पाण्डयमण्डले पातिव्रत्यमहिमा भूत्वा चेरदेशे भौतिकं समापितवत्याः कण्णक्याः दिव्यचरित्र मस्मिन् काव्ये विराजते । तस्याः पवित्र जीवितघटनाः कावेरीनदी संलिलवत् चेर-चोळ-पाण्डयान् प्राचीनतमिळदेशान् पुनन्ति स्म । अत स्तमिळाना मिदं जातीय काव्यमित्युक्तिः न साहसोक्तिः । धर्मपथानुवर्ती यो न भवति तं राजानं धर्मदेवतैव हन्यात् । पतिव्रता तु या नारी सा देवताना मादराभिधानपात्रं भवति । विधि मानवो न निरोद्धुं शक्नोति इत्येतत्सत्यत्रयं मनसि निधाय इळंगो पूज्यपादाः शिलप्पदिगारं व्यरचयन्निति वक्तुं युक्तम् ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

मणिमेखला शिलप्पदिगारयोः पश्चादुल्लेखनीयं कव्यं जीवकचिन्तामणिः भवति। शृङ्गाररसप्रधानं इदं काव्यं तिरुत्तक्कदेवर् नाम कश्चित् जैनमुनिः व्यरचयत्। चोळकुलाब्धिशंखश्रिति कथनात् स चोळवंशीय इति वक्तुं शक्यते। तिरुत्तक्कदेवर् क्री. श. 5-स शताब्दीय इति केचित् 9-शताब्दीय इत्यन्ये च केचिदभिप्रयन्ति।

जीवकचिन्तामणिकाव्यस्य "कुडिमोरुळ् तोडर्निलै शेय्युळ्" इति नामान्तर मप्यस्ति। धर्मार्थकाममोक्षाख्य चतुर्विध पुरुषार्थानां प्रतिपादनादस्य एतन्नाम सिद्धम्। जैनानां तात्त्विक रहस्यानां तत्सम्प्रदायाः इत्यादयोऽस्मिन् काव्यदर्पणे प्रतिबिम्बिता स्सन्ति। मनोहरै र्वर्णनैः मधुरया च शैल्या विराजमान मिदं काव्यं अर्वाचीनकवीनां मार्गदर्शक मासीत्। अतः जीवकचिन्तामणेः काव्यप्राशस्त्य मुपस्थापयितु मिद मेकं कारणं पर्याप्तं भवति।

एवमेव कुण्डलकेशि, वळयापति इति काव्ये स्तः। इमेऽपि जैन बौद्ध कर्तृके भवतः। परन्तु दुरदृष्टवशात् नामशेष स्थिते; काव्यकर्तारौ न ज्ञायेते।

जैनकवि प्रणीतेषु ग्रन्थेषु नालडियार् (चतुष्पदी) अपि समुल्लेखनीयोग्रन्थः। इन्नेवलास्तोत्रेण साकं अस्मिन्ग्रन्थे 401 पद्यानि सन्ति। तिरुक्कुरळवत् अयमपि नीतिग्रन्थको ग्रन्थः। "आलुं वेलुं पल्लवकुरवि, चालुं इरण्डुं शोल्लुक्कुरवि" (वटः क्रमेळक (विशेषः) (तेलुगु - तुम्ब) इच दन्तानां पटुत्वाय; चत्वारि द्वे च वाक्पटुत्वाय) इति सधुरोक्तिः काचिदस्ति। अर्थात् वटमूलस्य (ऊड) क्रमेळकस्य च दन्तकाष्ठं दन्तधावने उपयुक्तं

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

षत् दन्तपाटवं साध्यति यथा, तथैव चतुष्पदी - (नालडियार्), द्विपदी च (तिरक्कुरळ्) वाक्पाटवं सम्पादयतीति भावः। वस्तु तस्तु तिरक्कुरळग्रन्थस्य यावत्प्राशस्त्यं तावदेव प्राशस्त्यं तमिळ-साहित्ये नालडियार् ग्रन्थस्याप्यस्ति।

छन्दोलंकार ग्रन्थाः —

जैन बौद्धकाले च केवलं काव्यानि किन्तु छन्दोऽलंकारग्रन्था अपि बहवः प्रकाशिताः। तेषु 10 शताब्दीयेन अमितसागरेण रचितो याप्परुंगलं याप्परुंगलक्कारिगै (कारिका) इति ग्रन्थौ शताब्दीयेन बुद्धमित्रनाम्नकेन पण्डितेन प्रणीतं "वीरचोळीयं" जैनसहावलंबिना गुणवीरपण्डितेन कृतं "नेमिनादं" पवणन्दि प्रणीतः "नन्नूल्" नामकः लक्षणग्रन्थः, अज्ञातकर्तृकः "दण्डियलंकारं" चाय ग्रन्थः, इत्यादयः प्रमुखतया उल्लेखनीयाः। एतेषु बहवः संस्कृतविद्वांस इत्येत दवधेयम्।

"नन्नूल्" तालक्काप्पिय मनुसृत्यैव यद्यपि लिखितः तथाऽपि स ग्रन्थः तमिळ लक्षणशास्त्रग्रन्थेषु अत्युत्तमरत्नम्। संस्कृत-तमिळ व्याकरणविज्ञान समन्वयार्थं कृतं वीरचोळीयम्। दण्डियलंकारं दण्डिनः काव्यादर्शस्य द्राविडीकरणम्। तमिळवाङ्मये आलंकारिक ग्रन्थेषु अय प्रथमः। पिंगळमुनिकृतः "पिङ्गळनिघण्टुः" चाय-कश्चित् तमिळनिघण्टुरपि तदानीन्तनकाल एव प्रकाशितः। ततः पूर्वमेव दिवाकरं नाम निघण्टुः प्रकाशितः; अयं क्री. श. 8 शता-ब्दीय रचनेति पण्डिता अभिप्रयन्ति। एवं च सर्वथा जैन - बौद्ध-कालीन तमिळसाहित्यं अमूल्यमिति अवश्यवक्तव्यमस्ति। तत्राऽपि वैविध्यमपि दरीदृश्यत इति अवधेयोंऽशः।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

यद्यपि जैन बौद्धकालीन ग्रन्थाः तात्त्विकरहस्यपूर्णाः तथाऽपि तेषु तदानीन्तन सामाजिक स्थितिगतयः प्रतिबिम्बिताविति उत्तमकाव्यलक्षणानि उपलभ्यन्त इति च हेतोः तेषां न केवलं काव्ययशः, किन्तु तमिळवाङ्मये प्रमुखं स्थानमपि सिद्धम्। अथ, तेभ्यो ग्रन्थेभ्यः, विशिष्य तमिळपञ्चकाव्येभ्यः ज्ञेया राजकीय सामाजिक मतविषया दिङ्मात्रं परिशील्य प्रदर्शनीयाः।

काव्यपञ्चकं राजकीय - सामाजिकविषयाः —

शिलप्पदिगार कथाकाले चेरराज्यं शेंगुट्टुवान् नाम राजा चोळदेशं करिकालचोळो नाम भूपतिः पाण्यमण्डलं वेडुंजेळियन् नाम महीपालश्च परिपालयन्ति स्म। सर्वेऽप्येते सतसहिष्णुतां प्रदर्शितवन्तो विशालहृदयाः। तमिळभाषावाङ्मय ललितकलाश्च पोषितवन्तः सरसहृदयाः। एतेषु तमिळ-भूपतिषु करिकालचोळः उल्लेखनीयो भवति। यद्यप्येते सहृदयाः कलासाहित्यपोषकाश्चासन् तथाऽपि तेषां मध्ये पारस्परिक कलहबीजान्यासन्निति ज्ञायते।

तमिळराजानां परिपालने कावेरीपूंपट्टणं (प्रहार) (पूंपुगार्) मधुरा इत्यादीनि नगराणि धन-धान्यसम्पदा समृद्धान्यासन्। कावेरीपूंपट्टणं तेषु दिनेषु प्रसिद्धनौकाश्रय आसीत्। दूर-सुदूर देशेभ्यः तत्र नौका स्वयमागच्छन्ति स्मेति वदन्ति। तस्मिन्नगरे विभिन्नभाषा भाषमाणा बहवो जना बभूवुः। मधुरानगरे वीथ्यः सुदीर्घा अतिसुन्दराश्चाऽसन्। नगररक्षणे यवनभटा नियुक्ता आसन्निति जवश्रुतिः।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

तदानीन्तन तमिळसंघे धनिकावा वणिक्प्रमुखानां वैश्यकुलावतंसानां विशेषगौरव मुपलभ्यमान मासीदिति सुस्पष्टम्। तमिळपञ्चकाव्यप्रतिपादितेषु स्त्रीपुरुषेषु प्रमुखा वैश्या एव। तेषु बाल्यविवाहा एव भवन्ति स्मेति वक्तव्यमस्ति। विवाहकाले शिलप्पदिगार नामकः कोवलः षोडशवर्षदेशीयः; कण्णकिः त्रयोदशवर्षदेशीया कन्या। ब्राह्मणा अपि साधिक गौरवभाजनान्यासन्। किन्तु केचिद्ब्राह्मणाः तदात्व एव वेदशास्त्राध्ययनं परित्यज्य नृत्तगीतादि ललितकळासु कुशला आसन्। तदानीन्तने काले वेश्यागमनं सर्ववर्णानां साधारणी परिपाटि रासीत्। देश्याः नृत्तगीतादि कलासु वैदुष्यपूर्णा अभवन्। संसारस्त्रियः - कुटुम्बिन्यः ललितकलाभ्यासं कुर्वन्ति स्मेति वक्तुं नैवाधाराः सन्ति।

तेषु दिनेषु स्त्रियोऽपि सन्यासाश्रमं स्वीकुर्वन्ति स्म। पातिव्रत्यमेव स्त्रीणां मुख्यो धर्म इति निर्दिष्टम। व्रताचरणं, तीर्थयात्राभिगमनं पुण्यवदीष स्नानं इत्यादिकं आचारजातं प्रचारपथे स्थितम्। पतिसेवानिरतिरेव स्त्रीणां सद्गतिप्रदायिनीति विश्वासः प्रबल आसीत्। तदात्व एव आर्य - देशि - भेदः व्याप्तिगतः। करिकालचोळस्य सभाभवने माधवी नाम वेश्या प्रथमतः देशिनृत्यं प्रदर्श्य ततः पश्चात् आर्यपद्धति नृत्य मकरोदिति शिलप्पदिगारं ब्रवीति। तत्र वर्णिता - अरंगेट्रुगादैरंगाधिरोहणगाथा-परिशीलनीया। रंगाधिरोहणोत्सवे संगीताचार्याः, वैणिकः मार्दङ्गिकः, कविरित्यादयः सम्मिलन्ति स्म। पर्वतप्रान्तेषु

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

विवसन्तो जनाः "कुरव" इति देशीयनाट्यविशेषे निष्णाता आसन् । अयं रासक्रीडा अनुकरोतीति सुप्रसिद्धाः परिशोधक-विद्वांसः मु. राघवय्यंगार् महोदया विश्वसन्ति स्म ।

कर्षकाणामपि तदानीन्तनसंघे गौरवादरा स्समुपलब्धाः । शिल्पिनः चित्रलेखकाः इत्यदायोऽपि समादृता आसन् । निर्धना मृत्तिकाभित्तिकेषु गृहेषु निवसन्ति स्म । गृहाच्छादनार्थं तृण पर्णादिकं (तेलुगु-बोदकसवु, ताटिकोब्बरियाकुलु) उपयुक्तमासीत्।

तेष् दिनेषु तमिळदेशे जैनबौद्धमते उच्चस्थिता वास्तामिति च वक्तव्यतामपेक्षते । तमिळकाव्यपंचके मणिमेकलै कुण्डल-केशि नामके काव्ये बौद्धमतप्राशस्त्यं, शिलप्पदिगारं - जीवक-चिन्तामणि नामके काव्ये जैनमतप्राशस्त्यं च प्रकटयतः । जैनबौद्ध-मते महोन्नतदशायां — यद्यपि आस्तां, तथाऽपि शैव-वैष्णवमतेऽपि व्याप्तिं गते आस्ताम् । शक्त्याराधनं जन्तुबलिः इत्यादयोऽपि व्याप्ता आसन् । एतावता मतानां प्रचारे सत्यपि मतकलहाद्वा नैव प्रसक्तिः । कावेरीपूं-पट्टणे जैन-बौद्ध-विहारै स्साकं शिव-केशवालयाः कुमारस्वामिनः, इन्द्रालयः, कृष्ण-बलरामालयो च आसन् । तदात्वे कुटुम्बगतैः सर्वैः एकमतावलम्बिभि र्भव्य मिति नियमो नास्तीत्येव वक्तुं शक्यम् । इन्द्रोत्सवः महता वैभवेन प्रचाल्यमान आसीत् । शकुनेषु, ज्योतिश्शास्त्रे, पुन-र्जन्मनि, कर्मसिद्धान्ते च तत्कालीनजनानां विश्वास आसीत् । तत्कालीन जनाः नागरिकाः दैवभक्ताः सरसहृदया श्चासन्निति प्रतीयते ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

उपसंहारे —

जैन-बौद्ध-युगे प्रकाशितेषु ग्रन्थेषु संस्कृतशब्दाः अनेकार्य-गाथाश्च सम्प्रविष्टाः। अर्थात् — तऽकाले संस्कृतभाषायाः तदीयवाङ्मयस्य च तमिळजनपदे बहुल. प्रचार समुपलब्ध इति भावः। यत्किंचिदस्तु, जैन बौद्धकविप्रणीतानां काव्यानां तमिळ-पञ्चकाव्ययश स्सम्प्राप्तमित्येत दविस्मरणीयम्।

शैव वैष्णवाचार्याणां युगम्

जैन बौद्धमताचार्याणां प्राबल्ये लप्यमाने तमिळदेशे पुनः शैव वैष्णवयोः उत्थानदशा प्रारब्धा। शैवमतं अतिप्राचीनं मतम्। द्रमिळशैवाः तदाऽद्याऽपि शाकाहारिण एव। ततः मांसाहारिणां मद्यापानरतानां आर्याणां आचार-व्यवहाराः प्रप्रथमं तमिळ-शैवानां वाधिषता आसन्। किन्तु शैवमते दिने दिने ऋतुकलापाः पर्वतोपमाः प्रवृद्धाः इति हेतोः, अन्यैः कतिपय कारणैश्च जैन-बौद्धमतयोः अनायासेन शैवानां आदराभिमानौ सम्प्राप्तौ। बहवः शैवाः जैन-बौद्धमतावलम्बिनो बभूवुः। किन्तु कालक्रमेण वैदिकविज्ञानस्य प्रजादराभिमानयोः सम्प्राप्तयोः सतोः जैन बौद्ध प्रभावं ह्रासं जातम्। तेन साकं बसवेश्वरस्य वीरशैवमपि व्याप्ति गतम्। एवं च, वैदिकशैवं अवैदिकशैव मिति मत-प्रभेदेन शैवं बहुलप्रचारं गतम्।

अयं सकालः यदा एकतः शैव मन्यतो वैष्णवं च प्रवर्धमान मासीत्। शैव (समयाचार्याणां) (सम्प्रदायस्य) प्रवर्तकानां नायन्मारा इति वैष्णव (सम्प्रदाय) मतप्रवर्तकानां आळ्वारा इति च व्यवहारनामं प्रसिद्धमासीत्। भक्तिवादेन स्वस्वा द्भुत महिमातिशयेन च ते प्रजाभिमानपात्रतां गताः।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

Please mention your membership Number for easy correspondence.

R. N. 1845/60 *Postal C. T. R. II*

आन्ध्रप्रदेशसर्वकारेणानुमोदिता R. C. No. 27-A 3/65

Dated 14-7-'65 . Licensed to Post without Prepayment LICECE No. 1

गैर्वाणी

वार्षिकम् ८-००

To

Sri

[illegible] Vilasini Sabha.

If undelivered please return to
Samskritha Bhasha Pracharini Sabha, Chittoor A. P. 517001.

Published by Sri *N.* Ramanatha Aiyar B. A , B. L , Advocate & Secretary, S. B. P. Sabha Chittoor. (A. P.)
Printed by Sri K. V. Raghavan (in-charge)
at Vijaya Press, Chittoor. A. P. C. 1500.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,